# अतिलघूत्तरात्मक प्रश्न

**अधोलिखितं अपठितगद्यांश पठित्वा एतदाधारित प्रश्नानां यथानिर्देशं उत्तराणि लिखत–**

**1.** मातृभूमिं प्रति प्रेम्णः त्यागस्य, आत्मोत्सर्गस्य, सर्वस्वार्पणस्य च नैके समुज्ज्वला: पृष्ठाः राजस्थानस्य इतिहासे मिलन्ति परन्तु 'रातीघाटी' नामकस्य युद्धस्य उल्लेख: राजस्थानस्य इतिहासे लुप्तप्रायः वर्तते। बादशाह बाबर इत्यस्य पुत्रः (हुमायूं: इत्यस्य अनुजः) कामरानः बीकानेरस्य राजा राव जैतसी च इत्यनयोः द्वयोः मध्ये बीकानेरे घटितं महत्युद्धं भारतीय-शौर्यस्य गौरवशालिनी कथा अस्ति। अस्य युद्धस्य तिथि: 26 ओक्टोबर् 1534 ए.डी.इत्यस्ति।भारतं जेतुम्लाहोरात् आगतः कामरानः पलायितः। तस्य शिरस्त्राणं (मुकुटम् ) मध्येमार्ग'छोटड़िया' ग्रामे पतितम्।अद्यापि तन्मुकुटम् तद्ग्रामे सुरक्षितम् अस्ति। अस्य रातीघाटी-युद्धस्य किञ्चिद् विस्तृत वर्णनं बीठू सूजा' इत्यनेन रचिते 'छन्द राव जैतसी रो' इत्यस्मिन् ग्रन्थे वर्तते।अस्य च ग्रन्थस्य उद्धारंडॉ.एल.पी. टैस्सीटोरी अकरोत्।

**(i) अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखतु।**

**उत्तरम्–** रातीघाटी-युद्धम्।

**(ii) राजस्थानस्य इतिहासे कस्य युद्धस्य उल्लेखः लुप्तप्रायः वर्तते?**

**उत्तरम्–** राजस्थानस्य इतिहासे 'रातीघाटी' नामकस्य युद्धस्य उल्लेखः लुप्तप्रायः वर्तते।

**(iii) 'रातीघाटी' इति महत्युद्धं कस्य गौरवशालिनी कथा अस्ति?**

**उत्तरम्–**'रातीघाटी' इति महत्युद्धं भारतीय-शौर्यस्य गौरवशालिनी कथा अस्ति।

**(iv) कामरानः किमर्थं लाहोरात् आगतः?**

**उत्तरम्–** कामरानः भारतं जेतुं लाहोरात् आगतः।

**(v) 'पलायितः' इति क्रियापदस्य कर्तृपदं किमस्ति?**

**उत्तरम्–** कामरानः।

**(vi) 'पृष्ठाः' इति विशेष्यपदस्य गद्यांशे विशेषणपदं किं प्रयुक्तम्?**

**उत्तरम्–** समुज्ज्वलाः।

**(vii) 'तस्य शिरस्त्राणम्......' इत्यत्र 'तस्य' इति सर्वनामपदस्थाने संज्ञापदं किम्?**

**(अ) कामरानस्य (ब) बाबरस्य (स) हुमायोः (द) युद्धस्य**

**उत्तरम्–** (अ) कामरानस्य।

**(viii) "शिरस्त्राणम्' इत्यस्य पर्यायपदं किम्?**

**उत्तरम्–** मुकुटम्।

**(ix) 'अनुजः' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्–** छोटा भाई।

**(x) 'अकरोत्' इति पदे लकार-पुरुष-वचनं लिखत ।**

**उत्तरम्–** लङ्लकारः, प्रथमपुरुषः, एकवचनम्।

**(xi)- मातुः अभ्यधिका कृपा कस्मिन् भवति?**

**उत्तरम्--** मातुः अभ्यधिका कृपा दुर्बले सुते भवति।

**(xii) केन समः बन्धुः नास्ति?**

**उत्तरम्–** उद्यमेन समः बन्धुः नास्ति।

**(xiii). वनराजः कैः दुरवस्थां प्राप्तः?**

**उत्तरम्–** वनराजः तुच्छजीवैः वानरैः दुरवस्थां प्राप्तः।

**(xiv) जन: किमर्थं पदातिः गच्छति?**

**उत्तरम्-** जनः परमर्थकार्येन पीडितः आसीत्, अतएव सः पदातिः गच्छति।

**2. अद्य औद्योगिक विकासात् नगराणां विकासात् चजायते पर्यावरण प्रदूषितम्।अतः अद्य नागरिकाणां कर्त्तव्यमस्ति यद्वयं पर्यावरण संरक्षणार्थ प्रयत्नं कुर्मः तत्कृते वयं स्वच्छतांचधारयामः।महात्मागांधि महोदयस्यापि स्वच्छतोपरि विशेषः आग्रहे आसीत्।साम्प्रतमपि सर्वकारेण 'स्वच्छभारताभियानम्' प्रचालितम्। तस्योद्देश्यमपि पर्यावरणस्य संरक्षण अस्ति। एवमेव नदीतडागवापीनां जलस्य स्वच्छतायाः प्रेरणा वयं नमामि गंगे' इति अभियानेन ग्रहीतुं शक्नुमः।**

**(i) अस्य गद्यांशस्य उपयुक्तं शीर्षक लिखतु ।**

**उत्तरम्-** पर्यावरण-संरक्षणम्।

**(ii) पर्यावरण प्रदूषणं कस्माद् जायते।**

**उत्तरम्-** पर्यावरणप्रदूषणं औद्योगिकविकासात् नगराणां विकासात् च जायते।

**(iii) सर्वकारेण किम् अभियानम् प्रचालितम्?**

**उत्तरम्-** सर्वकारेण 'स्वच्छभारताभियानं' प्रचालितम्।।

**(iv) स्वच्छतायाःप्रेरणा केन ग्रहीतुं शक्यते?**

**उत्तरम्-** स्वच्छतायाः प्रेरणा 'नमामि गंगे' इति अभियानेन ग्रहीतुम शक्यते।

**(v). 'वयं पर्यावरण संरक्षणार्थ प्रयत्नं कुर्मः अत्र कुर्मः इति क्रियापदस्य कर्तृपदम् लिखतु।'**

**उत्तरम्-** वयम्।

**(vi) 'स्वच्छ भारतम्' इत्यनयोः पदयोः विशेषणपदम् लिखतु।**

**उत्तरम्-** स्वच्छ

**(vii) 'तस्योद्देश्यमपि' अत्र तस्य इति सर्वनामपदं कस्य स्थाने प्रयुक्तम्?**

**(अ) नमामि गंगे**

**(ब) स्वच्छभारताभियानम्**

**(स) शौचालय निर्माणम्**

**(द) अवकरनिस्तारणम्**

**उत्तरम्-** (ब) स्वच्छभारताभियानम्

**(viii) अधुना' इति पदस्य पर्यायवाचिपदं गद्यांशे किम् अस्ति?**

**उत्तरम्-** साम्प्रतम्।

**(ix) वापी इतिपदस्य हिन्दी अर्थः क?**

**उत्तरम्-** बावड़ी (जलाशय)

**(x) 'धारयामः' इतिपदे लकार-पुरुष-वचनं लिखत।**

**उत्तरम्-** लट्लकारः, उत्तमपुरुषः, बहुवचनम्

**(xi). कविः कुत्र संचरणं कर्तुम् इच्छति?**

**उत्तरम्-** कविः ग्रामान्ते एकान्ते कान्तारे सञ्चरणं कर्तुम् इच्छति ।

**(xii) कियता बलेन व्यायामः कर्तव्यः।**

**उत्तरम्-** अर्धबलेन व्यायामः कर्तव्यः।

**(xiii) 'सौहार्द प्रकृतेः शोभा' अस्मिन् नाटके कति पात्राणि सन्ति?**

**उत्तरम्-** अस्मिन् नाटके विविध पशुपक्षिणः दश पात्राणि सन्ति ।

**(xiv) निर्धनः जनः कथं वित्तम् उपार्जितवान्?**

**उत्तरम्-** निर्धनः जनः भूरि परिश्रम्य वित्तम् उपार्जितवान्।

**3.** संसारे एकतायाः अतीवावश्यकता वर्तते। विशेषतः कलियुगेऽस्मिन् संहतिः कार्यसाधिका।यतो हि वर्तमाने काले यादृशं सामाजिकं राष्ट्रियं च जीवनमस्ति, तस्य निर्माणाय रक्षणाय च संगठनं परमावश्यकम्। अद्यत्वे संसारे यस्मिन् राष्ट्रे एकतायाः अभावोऽस्ति, तत् राष्ट्रं सद्य एव परतन्त्रतापाशबद्धं भवति।अस्माकं देशस्य पारतन्त्र्यम् अनया एव एकतया सहयोगेन वा विच्छिन्नं जातम्। महात्मनागान्धिमहोदयेन तथैवान्यैश्च देशभक्तैः भारतीयसमाजे सर्वत्र एकत्वभावनोदयेन पराधीनतापाशस्य छेदनं विहितम्। अधुना लोकतन्त्रात्मकमस्माकं राष्ट्र संघटनबलेनैव स्वोन्नतिं विदधाति।

**(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।**

**उत्तरम्-** एकतायाः महत्त्वम्।

**(ii) राष्ट्रस्य निर्माणाय रक्षणाय च किं परमावश्यकम्?**

**उत्तरम्-** राष्ट्रस्य निर्माणाय रक्षणाय च संघटनं परमावश्यकम्।

**(iii) अस्माकं देशस्य पारतन्त्र्यं केन विच्छिन्नं जातम्?**

**उत्तरम्-** अस्माकं देशस्य पारतन्त्र्यम् एकतया सहयोगेन वा विच्छिन्नं जातम् ।

**(iv) कीदृशः देशः सकललोकसम्माननीयो भवति?**

**उत्तरम्-** यस्मिन् देशे एकताऽस्ति, सः देशः सकललोकसम्माननीयो भवति।

**(v) 'आदधाति' इति क्रियापदस्य कर्तृपदं किमस्ति?**

**उत्तरम्-** एकता।

**(vi) 'बहूनाम्' इति विशेषणस्य गद्यांशे विशेष्यपदं किम्?**

**उत्तरम्-** जनानाम्।

**(vii) 'अनया' इति सर्वनामपदस्य स्थाने संज्ञापदं किमस्ति?**

**(अ) एकतया (ब) सहयोगेन (स) लोकेन (द) संहत्यया**

**उत्तरम्-** (अ) एकताया।

**(viii) स्वतन्त्रता' इत्यस्य विलोमपदं गद्यांशे किम् प्रयुक्तम्?**

**उत्तरम्-** परतन्त्रता।

**(ix) 'सद्यः' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्-** शीघ्र।

**(x) "विदधाति' इति पदे लकार-पुरुष-वचनं लिखत।**

**उत्तरम्-** लट्लकार-प्रथमपुरुष-एकवचनम्।

**(xi) अनिशं महानगरमध्ये किं प्रचलति?**

**उत्तरम्-** अनिशं महानगरमध्ये कालायसचक्रं प्रचलति।

**(xii) लोके महतो भयात् कः मुच्यते?**

**उत्तरम्-** लोके महतो भयात् बुद्धिमान् मुच्यते।

**(xiii) कीदृशं कर्म व्यायामसंज्ञितं कथ्यते?**

**उत्तरम्-** शरीरायासजननं कर्म व्यायामसंज्ञितम् कथ्यते।

**(xiv) कुशलवयोः वंशस्य कर्ता कः?**

**उत्तरम्—** कुशलवयोः वंशस्य कर्ता भगवान् सूर्यः वर्तते।

**4.** इदं हि विज्ञानप्रधानं युगम्। विशिष्टं ज्ञानं विज्ञानम्' इति कथ्यते।अस्यांशताब्द्यां सर्वत्र विज्ञानस्यैव प्रभावो दरीदृश्यते। अधुना नहि तादृशं किमपि कार्यं यत्र विज्ञानस्य साहाय्यं नापेक्ष्यते।आवागमने, समाचारप्रेषणे, दूरदर्शने, सम्भाषणे, शिक्षणे, चिकित्साक्षेत्रे, मनोरंजनकार्ये, अन्नोत्पादने, वस्त्रनिर्माणे, कृषिकर्मणि तथैवान्यकार्यकलापेषु विज्ञानस्य प्रभावस्तदपेक्षा च सर्वत्रैवानुभूयते। सम्प्रति मानवः प्रकृतिं वशीकृत्य 'तां स्वेच्छया कार्येषु नियुक्ते। तथाहि वैज्ञानिकैरनेके आविष्काराः विहिताः। मानवजातेः हिताहितम् अपश्यद्भिः वैज्ञानिकैः राजनीतिविज्ञैर्वा परमाणुशक्तेः अस्त्रनिर्माणे एव विशेषतः उपयोगो विहितः। तदुत्पादितं च लोकध्वंसकार्यम् अतिघोरं निपुणं च। अयं च न विज्ञानस्य दोषः न वा परमाणुशक्तेरपराधः, पुरुषापराधः खलु एषः।

अतोऽस्य मानवकल्याणार्थमेव प्रयोगः करणीयः।

**(i) उपर्युक्तगद्यांशस्य समुचितं शीर्षकं लिखत।**

**उत्तरम्---** विज्ञानस्य प्रभावः।

**(ii) अधुना समस्तकार्यकलापेषु कस्य प्रभावः अनुभूयते?**

**उत्तरम्---** अधुना समस्तकार्यकलापेषु कस्य प्रभावः अनुभूयते?

**(iii) सम्प्रति मानवः कां वशीकृत्य तां स्वेच्छया कार्येष नियक्ते?**

**उत्तरम्---** सम्प्रति मानवः प्रकृति वशीकृत्य तां स्वेच्छया कार्येषु नियुक्त।

**(iv) अद्य वैज्ञानिकैः परमाणुशक्तेः विशेषतः कुत्र उपयोगो विहितः?**

**उत्तरम्---** अद्य वैज्ञानिकैः परमाणुशक्तेः विशेषतः कुत्र उपयोगो विहितः।

**(v) 'दरीदृश्यते' इति क्रियापदस्य कर्तृपदं किमस्ति?**

**उत्तरम्---** प्रभावः।

**(vi) 'विज्ञानप्रधानम्' इति विशेषणस्य गद्यांशे विशेष्यपदं किम्?**

**उत्तरम्---** युगम्।

**(vii) 'अस्याम्' इति सर्वनामपदस्य संज्ञापदं किमस्ति?**

**(अ) शिक्षायाम् (ब) शताब्द्याम् (स) प्रकृत्याम् (द) शक्त्याम्**

**उत्तरम्---** (ब) शताब्याम्।

**(viii) "हितम्' इत्यस्य गद्यांशे विलोमपदं किं प्रयुक्तम्?**

**उत्तरम्---** अहितम्।

**(ix) 'सम्प्रति' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्---** अब, इस समय।

**(x) 'कथ्यते' इति पदे लकार-पुरुष-वचनं लिखत।**

**उत्तरम्---** लट्लकार-प्रथमपुरुष-एकवचनम्।

**(xi) जरा कस्य सकाशं सहसा न समधिरोहति?**

**उत्तरम्---** जरा व्यायामाभिरतस्य सकाशं सहसा न समधिरोहति।

**(xii) बालभावात् हिमकरः कुत्र विराजते?**

**उत्तरम्---** बलभावात् हिमकरः भगवतः शिवस्य मस्तके विराजते।

**(xiii) माता सुरभिः किमर्थम् अश्रूणि मुञ्चति स्म?**

**उत्तरम्---** माता सुरभिः भूमौ पतिते स्वपुत्रं दृष्ट्वा अश्रूणि मुञ्चति स्म।

**(xiv) वस्तुतः चौरः कः आसीत्?**

**उत्तरम्-** वस्तुतः चौरः ग्रामस्य आरक्षी आसीत् ।

**5.** स्त्रियो हि मातृशक्तेः प्रतीकभूताः भवन्ति।निसर्गादेव तासु गृहस्थजीवनस्योत्तरदायित्वं बालकानां भरण-पोषणादिकस्य च दायित्वं समापतति। शिशौ संस्काराधानस्य, सदाचरणशिक्षणस्य, भर्तुः सहयोगस्य, पारिवारिकजनानां सेवायाः, समागतानामभ्यागतानांशुश्रूषायाः, लोकहितसम्पादनस्य च समग्रमपि कर्त्तव्यजातं स्त्रीषु निपतति। अतः स्त्रीणां कृते शिक्षायाः परमावश्यकता वर्तते। सुगृहिणी तदैव सा सम्भवति तदा सुशिक्षिता स्यात्, सुशिक्षयैव परिवारस्य समाजस्य राष्ट्रस्य च हितं सम्पादयितुं सा समर्था भवति।

गृहस्य सुशिक्षिता स्त्री सद्गृहिणी गृहलक्ष्मीः गृहस्वामिनी वा भवति, सैव मातृभूता सवंशं सन्नागरिक च निर्मातुं प्रभवति। स्त्री एव समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति। अतः समाजे राष्ट्र वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः। मातृदेवो भव' इति कथनमपि तदैव सुसङ्गतं भवति।स्त्रीसमाजस्योन्नतिमेव विचिन्त्य मनुनापि कथितम्—

'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।'

**(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

**उत्तरम्-** स्त्री-शिक्षायाः महत्त्वम्।

**(ii) स्त्री एव समाजे केषां स्थापनां करोति?**

**उत्तरम्-** स्त्री एव समाजे धार्मिक संस्काराणां सद्गुणादिकानां च स्थापनां करोति।

**(iii) मातृशक्ते गौरवरक्षणं कदा सम्भवति?**

**उत्तरम्-** मातृशक्तेः गौरवरक्षणं तदैव सम्भवति यदा सा सुशिक्षिता स्यात् ।

**(iv) देवताः कुत्र रमन्ते?**

**उत्तरम्-** यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।

**(v) 'पूज्यन्ते' इति क्रियापदस्य कर्तृपदं किमस्ति?**

**उत्तरम्-** नार्यः।

**(vi) 'समग्रमपि' इति विशेषणस्य विशेष्यपदं किम्?**

**उत्तरम्-** कर्त्तव्यजातम्।

**(vii) 'ताः सुशिक्षिताः स्युः' इत्यत्र 'ताः' सर्वनामपदस्थाने संज्ञापदं किम्? '**

**(अ) मातृशक्ति (ब) बालिकाः (स) गृहलक्ष्मीः (द) स्त्रियः**

**उत्तरम्-** (द) स्त्रियः।

**(viii) 'निरादरः' इत्यस्य गद्यांशे विलोमपदं किं प्रयुक्तम्?**

**उत्तरम्-** समादरः।

**(ix) 'भर्तुः' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्-** पति का।

**(x) 'रमन्ते' इति पदे लकार-पुरुष-वचनं लिखत।**

**उत्तरम्-** लट्लकार-प्रथमपुरुष-बहुवचनम्।

**(xi) कस्य विरुद्धमपि भोजनं परिपच्यते?**

**उत्तरम्-** नित्यं व्यायाम कुर्वतः विरुद्धमपि भोजनं परिपच्यते।

**(xii) रामाय लवकुशयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत्?**

**उत्तरम्-** रामाय लवकुशयोः कण्ठाश्लेषस्य स्पर्शः हृदयग्राही आसीत्।

**(xiii) कृषकः किं करोति स्म?**

**उत्तरम्-** कृषक: बलीवर्दाभ्यां क्षेत्रकर्षणं करोति स्म।

**(xiv) नराणां प्रथमः शत्रुः कः?**

**उत्तरम्-** नराणां प्रथमः शत्रुः क्रोधः।

**6. अस्माकं देशे षड् ऋतवः नवचेतना सञ्चरणाय समायान्ति। तत्रापि वर्षा कालं दृष्ट्वा सर्वे नन्दन्ति। अयं ग्रीष्मानन्तरं समायाति।वर्षाकाले आकाशे मेघाः आयान्ति। ते गर्जन्ति वर्षन्ति च। सौदामिन्यः स्फुरन्ति। सर्वत्र जलं भवति।वर्षाजलैः स्नाता वसुन्धरा मोदते।सर्वत्र हरीतिमा विभाति।वर्षाकाले मण्डूकाः रटन्ति। मयूराः नृत्यन्ति। वृक्षाः पल्लविताः भवन्ति। निर्झराः मधुरं नदन्ति, नद्यः वेगेन वहन्ति।वर्षाकाले ग्रामे मार्गाः पङ्कमयाः भवन्ति।जलाशयाः कूपाः अपि पूर्णाः भवन्ति । कृषकाणां कृते वृष्टिः एव जीवनम् अस्ति।**

**(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत ।**

**उत्तरम्—** वर्षाकालः।

**(ii) अस्माकं देशे षड् ऋतवः किमर्थं समायान्ति?**

**उत्तरम्—** अस्माकं देशे षड् ऋतवः नवचेतना सञ्चरणाय समायान्ति।

**(iii) कैः स्नाता वसुन्धरा मोदते?**

**उत्तरम्—** वर्षाजलैः स्नाता वसुन्धरा मोदते।

**(iv) वर्षाकाले कुत्र मार्गाः पङ्कमयाः भवन्ति?**

**उत्तरम्—** वर्षाकाले ग्रामे मार्गाः पङ्कमयाः भवन्ति।

**(v) 'निर्झराः' इति कर्तपदस्य क्रियापदं किमस्ति?**

**उत्तरम्—** नदन्ति।

**(vi) 'षड्' इति विशेषणस्य गद्यांशे विशेष्यपदं किं प्रयुक्तम्? ।**

**उत्तरम्—** ऋतवः।

**(vii) 'ते गर्जन्ति वर्षन्ति च'-इत्यत्र 'ते' सर्वनामपदस्थाने संज्ञापदं किम्?**

**(अ) निर्झराः (ब) मेघाः (स) मण्डूकाः (द) सौदामिन्यः**

**उत्तरम्—** (ब) मेघाः

**(viii) पृथ्वी' इति पदस्य गद्यांशे पर्यायपदं किमस्ति?**

**उत्तरम्—** वसुन्धरा।

**(ix) 'सौदामिन्यः' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्—** बिजलियाँ।

**(x) 'नृत्यन्ति' इति पदे लकार-पुरुष-वचनं लिखत।**

**उत्तरम्—** लट्लकारः, प्रथमपुरुषः, बहुवचनम्।

**(xi) कविः किमर्थं प्रकृतेः शरणम् इच्छति?**

**उत्तरम्--** महानगरे जीवितं दुर्वहं जातम्, अतः कविः प्रकृतेः शरणम् इच्छति।

**(xii) व्यायामः कदा पथ्यतमः स्मृतः?**

**उत्तरम्—** व्यायामः शीते वसन्ते च पथ्यतमः स्मृतः।

**(xiii) रामः लवकुशौ कुत्र उपवेशयितुम कथयति?**

**उत्तरम्--** रामः लवकुशौ स्वस्य सिंहासने उपवेशयितुम् कथयति।

**(xiv) काकचेष्टः विद्यार्थी कीदृशः छात्रः मन्यते?**

**उत्तरम्---** काकचेष्टः विद्यार्थी आदर्शच्छात्रः मन्यते।

**7.** परेषाम् उपकारः परोपकारः उच्यते। "सर्वः स्वार्थं समीहते" इत्यपि कस्यचित् कवेः उक्तिः अस्ति।स्वार्थाय सर्वेऽपि प्राणिनः जीवन्ति। किन्तु यस्य जीवनम् अन्येभ्यः अस्ति,अपरेषां प्राणिनां सुखाय यः प्रयतते, कष्टं सहते च वस्तुतः तस्यैव जीवनं सार्थकम् अस्ति। पश्य, गावः अन्येभ्यः दुग्धं प्रयच्छन्ति, अतः जनाः "मातर" इति वदन्ति। नदी अपि स्वजलं स्वयं न पिबति, अन्येषां प्राणिनां कृते ददाति।मेघान् पश्यत। स्वजलं सर्वेभ्यः वितरन्ति।पुष्पाणि सर्वेभ्यः सुगन्धं वितरन्ति। वृक्षाः फलानि प्रयच्छन्ति।मातृसमा उपकारिणी का विद्यते जगति? अतः स्वार्थं विहाय अन्येभ्यः जीवनमेव वरम्।

**(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

**उत्तरम्-** परोपकारस्य महत्त्वम्।।

**(ii) कः परोपकारः कथ्यते?**

**उत्तरम्-** परेषाम् उपकारः परोपकारः कथ्यते।

**(iii) सर्वेऽपि प्राणिनः कस्मै जीवन्ति?**

**उत्तरम्-** सर्वेऽपि प्राणिनः स्वार्थाय जीवन्ति।

**(iv) किं वरं विद्यते?**

**उत्तरम्-** स्वार्थं विहाय अन्येभ्यः जीवनमेव वरं विद्यते।

**(v) 'गावः' इति कर्तृपदस्य क्रियापदं किमस्ति?**

**उत्तरम्-** प्रयच्छन्ति।

**(vi) 'ते स्वजलं सर्वेभ्यः वितरन्ति'-इत्यत्र 'ते' इति सर्वनामपदस्थाने संज्ञापदं लिखत।**

**(अ) मेघाः (ब) वृक्षाः (स) जनाः (द) नद्यः**

**उत्तरम्-** (अ) मेघाः

**(vii) आणिनाम्' इति विशेष्यपदस्य गद्यांशे विशेषणपदं किम्?**

**उत्तरम्-** अपरेषाम्।

**(viii) 'निरर्थकम्' इत्यस्य गद्यांशे विलोमपदं किमस्ति?**

**उत्तरम्-** सार्थकम्।

**(ix) 'जगति' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्-** संसार में।

**(x) 'ददाति' इति पदे लकार-पुरुष-वचनं लिखत्।**

**उत्तरम्-** लट्लकार-प्रथमपुरुष-बहुवचनम्।

**(xi) स्वस्थजीवनाय कीदृशे वातावरणे भ्रमणीयम्?**

**उत्तरम्-** स्वस्थजीवनाय शुद्धवातावरणे भ्रमणीयम्

**(xii) व्यायामात् किम् उपजायते?**

**उत्तरम्-** व्यायामात् श्रमक्लमपिपासोष्णशीतादीनां सहिष्णुता आरोग्यं चोपजायते।

**(xiii) जननी कीदृशी भवति?**

**उत्तरम्-** जननी सर्वेष्वपत्येषु तुल्यवत्सला भवति।

**(xiv) बुद्धयः कीदृश्यः भवन्ति?**

**उत्तरम्-** बुद्धयः परेङ्गितज्ञानफलाः भवन्ति?

**8.** दैनन्दिनव्यवहारे यः सहायतां करोति सः बन्धुः भवति। यदि विश्वे सर्वत्र एतादृशः भावः भवेत् तदा विश्वबन्धुत्वं सम्भवति। परन्तु अधुना संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति। मानवा परस्परं न विश्वसन्ति। ते परस्य कष्टं स्वकीयं कष्टं न गणयन्ति। अपि च समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति, तेषां उपरि स्वकीयं प्रभुत्वं स्थापयन्ति। संसारे सर्वत्र विद्वेषस्य शत्रुतायाः हिंसायाः च भावना दृश्यते, देशानां विकासः अपि अवरुद्धः भवति। इयं महती आवश्यकता वर्तते यत् एकः देशः अपरेण देशेन सह निर्मलेन हृदयेन बन्धुतायाः व्यवहारं कुर्यात्। विश्वस्य जनेषु इयं भावना अवश्यकी। ततः विकसिताविकसितयोः देशयोः मध्ये स्वस्था स्पर्धा भविष्यति। सर्वे देशा ज्ञानविज्ञानयोः क्षेत्रे मैत्रीभावनया सहयोगेन च समृद्धि प्राप्तुं समर्था भविष्यन्ति। सूर्यचन्द्रयोः प्रकाश: सर्वत्र समानरूपेण प्रसरति। प्रकृतिः अपि सर्वेषु समत्वेन व्यवहरति। तस्मात् अस्माभिः सर्वैः परस्परं

वैर-भावम् अपहाय विश्वबन्धुत्वं स्थापनीयम्।

**(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

**उत्तरम्--** विश्वबन्धुत्वम्।

**(ii) बन्धुः कः भवति?**

**उत्तरम्--** दैनन्दिनव्यवहारे यः सहायतां करोति सः बन्धुः भवति।

**(iii) अधुना संसारे कस्य वातावरणम् अस्ति?**

**उत्तरम्--** अधुना.संसारे कलहस्य अशान्तेः च वातावरणम् अस्ति।

**(iv) समर्थाः देशाः कान् प्रति उपेक्षाभावं प्रदर्शयन्ति?**

**उत्तरम्--** समर्थाः देशाः असमर्थान् देशान् प्रति उपेक्षाभावं प्रदर्शयन्ति।

**(v) 'प्रकृतिः' इति कर्तपदस्य क्रियापदं किमस्ति?**

**(अ) व्यवहरति (ब) प्रसरति (स) भवति (द) करोति**

**उत्तरम्--** (अ) व्यवहरति।

**(vi) 'देशान्' इत्यस्य पदस्य गद्यांशे विशेषणपदं किं प्रयुक्तम्?**

**(अ) समर्थान् (ब) ज्येष्ठान (स) असमर्थान् (द) पीडितान**

**उत्तरम्--** (स) असमर्थान् ।

**(vii) 'ते परस्य कष्ट.............।' इत्यत्र 'ते' इति सर्वनामपदस्थाने संज्ञापदं लिखत।**

**(अ) जनाः (ब) मानवाः (स) देशाः (द) शत्रवः**

**उत्तरम्--** (ब) मानवाः ।

**(viii) 'अधस्तात्' इति पदस्य गद्यांशात् चित्वा विलोमपदं लिखत।**

**उत्तरम्--** उपरि।

**(ix) 'परस्य' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्--** दूसरे का।

**(x) 'कुर्यात्' इति पदे लकार-पुरुष-वचनं लिखत।**

**उत्तरम्--** विधिलिङ्लकारः-प्रथमपुरुष-एकवचनम् ।

**(xi) कुत्र पदयात्रा न शुभावहा?**

**उत्तरम्--** निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा।

**(xii)प्राणिनां लाभ: केन प्रजायते?**

**उत्तरम्-** अन्योन्यसहयोगेन प्राणिनां लाभः प्रजायते।

**(xiii) रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः कीदृशः आसीत्?**

**उत्तरम्--** रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः हृदयग्राही आसीत्।

**(xiv) पाषाणी सभ्यता कुत्र समाविष्टाः न स्यात?**

**उत्तरम्--** पाषाणी सभ्यता निसर्गे समाविष्टाः न स्यात्।

**9.** संस्कृतभाषायाः वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञाः कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते।अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति।कालिदास-सदृशानां विश्वकवीनां काव्यसौन्दर्यम् अनुपमम्।चाणक्यरचितम् अर्थशास्त्रं

जगति प्रसिद्धमस्ति।गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणी अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। भारतसर्वकारस्य विभिन्नेषु विभागेषुसंस्कृतस्य सूक्तयः ध्येयवाक्यरूपेण स्वीकृताः सन्ति।भारतसर्वकारस्य राजचिह्न प्रयुक्तों सूक्तिं 'सत्यमेव जयते' सर्वे जानन्ति।एतमेव राष्ट्रिय शैक्षिकानुसन्धानप्रशिक्षण-परिषदः ध्येयवाक्यं 'विद्ययाऽमृतमश्नुते' वर्तते।

**(i) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।**

**उत्तरम्**-- संस्कृतभाषायाः महत्त्वम्।

**(ii) संस्कृतवाङ्मयं कैः समृद्धमस्ति?**

**उत्तरम्**-- संस्कृतवाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रादिभिश्च समृद्धमस्ति। ।

**(iii) 'विद्ययाऽमृतमश्नुते' इति कस्य ध्येयवाक्यम्?**

**उत्तरम्**-- इति राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः ध्येयवाक्यम्।

**(iv) भारतसर्वकारस्य राजचिह्न का सूक्तिः प्रयुक्ता?**

**उत्तरम्**-- 'सत्यमेव जयते' इति सूक्तिः प्रयुक्ता।

**(v) 'अकरोत्' इति क्रियापदस्य कर्तृपदं किमस्ति?**

**उत्तरम्**-- भास्कराचार्यः

**(vi) 'सर्वोत्तमा' इति विशेषणस्य विशेष्यपदं गद्यांशे किमस्ति?**

**उत्तरम्**-- भाषा।

**(vii) "अस्याः वाङ्मयं........।" इत्यत्र 'अस्याः ' इति सर्वनामस्थाने संज्ञापदं लिखत।**

**(अ) आङ्ग्लभाषायाः (ब) गणितस्य (स) नीतिशास्त्रस्य (द) संस्कृतभाषायाः**

**उत्तरम्**-- (द) संस्कृतभाषायाः

**(viii) संसारे' इति पदस्य गद्यांशात् पर्यायपदं चित्वा लिखत ।**

**उत्तरम्**-- जगति

**(ix) 'जानन्ति' इति पदस्य हिन्दी अर्थः कः?**

**उत्तरम्**-- जानते हैं।

**(x) 'अकरोत्' इति पदे लकार-पुरुष-वचनम् लिखत।**

उत्तराणि- लङ्ल कार-प्रथमपुरुष-एकवचनम्

**(xi) वसन्तस्य गुणं कः जानाति?**

**उत्तरम्**-- वसन्तस्य गुणं पिकः जानाति।

**(xii) मयूरः कथं नृत्यमुद्रायां स्थितः भवति?**

**उत्तरम्**-- मयूरः पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः भवति ।

**(xiii) मतिवैभवशलिनः दुष्कराणि कार्याणि कथं साधयन्ति?**

**उत्तरम्**-- मतिवैभवशालिनः दुष्कराणि कार्याणि नीतिं युक्तिं समालम्ब्य साधयन्ति।

**(xiv) कुशलवयो: मातरं वाल्मीकिः केन नाम्ना आह्वयति?**

**उत्तरम्**-- कुशलवयोः मातरं वाल्मीकिः वधूरिति नाम्ना आह्वयति।